संस्कृतवार्ता

दिनाङ्क : 30/09/2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

· निर्वाचनायोगेन अद्य बिहार-विधानसभा-निर्वाचनेभ्यः प्राक् अन्तिमा मतदाता-सूचिः प्रकाशिता।

· भारतेन गाजा सङ्घर्ष-समाप्तेः अमरीकायाः योजनायाः स्वागतं कृतम्। प्रधानमन्त्रिणा नरेन्द्र-मोदिना अयं शान्त्यै व्यवहार्य-मार्गः उक्तः।

· रक्षामन्त्री राजनाथसिंहः अवोचत् सिन्दूराभियानावधौ भारतीय-सशस्त्रबलनां परस्पर-सञ्चालन-क्षमतया ऐक्यभावनया च महत्वपूर्णा भूमिका निभालिता।

· देशे अद्य दुर्गा अष्टमी पर्व महतोल्लासेन आचर्यते।

· गुवाहाट्यां महिलानां एकदिवसीय-विश्व-चषक-क्रिकेट-स्पर्धायाम् अद्य प्रथमा स्पर्धा भारत श्रीलंका दलयोः मध्ये प्रचलति।

निर्वाचनायोगः बिहारमतदातासूचिः

निर्वाचनायोगेन बिहारे विशेष-गहन-पुनरीक्षणस्य अन्तर्गतम् अद्य अन्तिमा मतदाता सूचिः प्रकाशिता। इयं निर्वाचनायोगस्य आधिकारिके वेबसाइट इति अन्तर्जाल-पटले उपलब्धा अस्ति। बिहारस्य मुख्य-निर्वाचनाधिकारी कार्यालयस्य अनुसारं मतदातासूचेः प्रतयः समेभ्यः जनपद-निर्वाचनाधिकारिभ्यः सह-जनपदाधिकारिभ्यः च प्रदास्यन्ते।

## प्रधानमन्त्री गाजा

भारतेन गाजा सङ्घर्षं समापयितुम् एकस्याः व्यापक-योजनायाः अमरीकाय-राष्ट्रपतेः डॉनल्ड ट्रम्पस्य घोषणायाः स्वागतं कृतम्। सामाजिकसञ्चारपटले प्रधानमन्त्रिणा नरेन्द्र-मोदिना उक्तं यत् इयं योजना फिलिस्तीन- इज़राइल-देशयोः नागरिकैः सह पश्चिम एशिया-क्षेत्राय च दीर्घकालिक-स्थायी-शांति-सुरक्षा-विकासनां व्यवहार्य-मार्गं प्रददाति। प्रधानमन्त्रिणा आशा प्रकटिता यत् समेपि सम्बद्ध-पक्षाः राष्ट्रपतेः ट्रम्पस्य पदक्षेपाय एकमत्यं भविष्यन्ति। अमुं सङ्घर्षं समापयितुं शान्तिं सुनेश्चेतुम् अस्य प्रयासस्य समर्थनं करियन्ति। भारते इस्राइल-देशस्य राजदूतेन रूवेन अज़ार इत्यनेन गाजा इत्यत्र सङ्घर्षं समापनोद्देश्येन अमरीकायाः नेतृत्वयुतायाः शान्ति योजनायाः समर्थनाय प्रधानमन्त्रिणः नरेन्द्र-मोदिनः आभारः प्रकटितः। अद्य नवदिल्ल्यां संवाददातृ-सम्मेलने श्रीमता अज़ारेण अयं घटनाक्रमः ऐतिह्यं प्रोक्तम्।

## रक्षामन्त्री रक्षासेवा

रक्षामन्त्री राजनाथ-सिंहः अवोचत् यत् भारतीय-सशस्त्र-बलानां मध्ये परस्परं सञ्चालनक्षमता ऐक्यं च वर्तमान-समये सफल-सञ्चालनस्य आवश्यकता जायेते। राजधान्यां नव-दिल्ल्याम् अद्य सैन्यत्रयस्य संगोष्ठीं सम्बोधयन् श्रीसिंहः एतत् अवोचत्। तेनोक्तं यत् एतविश्यां शताब्द्याम् अपायाः संवर्धिताः। श्रीसिंहेनोक्तं यत् भूमिः समुद्रः वायुः अन्तरिक्षः साइबरस्पेस इत्येते परस्परं गहनतया सम्पृक्ताः। रक्षामन्त्री अवदत् यत् ऑपरेशन सिंदूर इति अभियानस्य अवधौ भारतेन स्वीय वायु रक्षा ऐक्ये बृहत्तरं प्रदर्शनं कृतम्। यत् निर्णायकं सञ्जातम्। यतोहि भारतीयसेना जगतः सर्वोत्तमा सेना वर्तते।

रक्षामन्त्री एकीकृत-सञ्चालनस्य अस्मिन् युगे निरीक्षण-लेखा-परीक्षा-प्रणाल्योः परस्परं निर्बाध-रूपेण संयोजने बलं प्रदत्तम्। अपि च उक्तं यत् साइबर-सूचना-युद्धस्य मानकानाम् ऐक्यस्य आवश्यकता वर्तते।

## रक्षाप्रमुखः परमाणु

रक्षाप्रमुखः जनरल अनिल चौहानः भविष्ये परमाण्वस्त्रैः उत्पत्स्यमानान्  जैविक- खतरों अथ  रेडियोधर्मी पदार्थैः रेडियो तरङ्गैः च जायमाने प्रदूषणे नियन्त्रणाय रक्षा-सन्नद्धतानाम् आह्वानम् अकरोत्। अद्य राजधान्यां नवदिल्ल्यां सैन्य-चिकित्या-सेवायाः शत-तमे   स्थापना दिवसे आयोजितं वैज्ञानिक-सत्रं सम्बोधयता तेनोक्तं यत् कोविड महामार्याः अनन्तरं  जैविकानाम् अपायानां सम्भावना समेधिता। जनरल चौहानेन परमाणु अपायान् विरुध्य निर्भय-भारताय प्रधानमन्त्रिणः नरेन्द्र-मोदिनः आह्वानमपि स्मारितम्।

## ट्रम्प शांति–योजना

यूरोपीय-मध्य-पूर्व-भागस्य नेतार: गाजा-कृते अमरीकाया: नवीन-शांति- योजनाया: स्वागतम् अकुर्वन्। योजनायां सैन्य – अभियानानां तत्काल-समापनस्य प्रस्तावो वर्तते । अमरीकाया: राष्ट्रपति: डॉनल्ड ट्रम्प: हमासं प्रति अवदत् यत् इयम् योजना स्वीकरणीया। संयुक्त अरब-अमीरात:-सऊदी अरब-कतर-मिस्र-जार्डन-तुर्किए-इंडोनेशिया-पाकिस्तानस्य च विदेशमंत्रिण: एकस्मिन् संयुक्ते वक्तव्ये युद्ध–समापनाय ट्रम्प वर्यस्य प्रयासानां प्रशंसाम् अकुर्वन्।

## राजीवरंजन सिंह: रोम

केन्द्रीयमंत्री राजीवरंजनसिंहः अवोचत् यत् भारतेन खाद्य सुरक्षा-सुनेश्चेतुं पोषण-सम्बद्धपरिणामेषु परिष्काराय आजीविका सुदृढ़ीकरणाय निर्धनतोन्मूलनाय च परिवर्तनकारी समावेशी पदक्षेपो विहित:। रोम इत्यत्र खाद्य-कृषि-संघटनस्य द्वितीये वैश्विक-सम्मेलने तेन भारतस्य कृषकसम्द्धेषु नवाचार-परिवर्तनेषु प्रोक्तं यत् देशे पशुधनदुग्धोपादक्षेत्रं समावेशि विकासाय गतिं ददाति।

## दुर्गा पूजा शुभकामना

नवरात्रपर्वणः अष्टमे दिने अद्य महाअष्टम्यां देव्याः दुर्गायाः महागौरी स्वरूपस्य पूजा विधीयते।

अत्रावसरे राष्ट्रपतिः द्रौपदी मुर्मुः प्रधानमन्त्री नरेन्द्र-मोदी  केन्द्रीय गृहमन्त्री अमित शाहः च देश-विदेशेषु भारतीय-नागरिकेभ्यः दुर्गापूजायाः शुभकामनाः दत्तवन्तः।

## चक्रवात: वियतनाम देशे

वियतनाम-देशे बुआलोई-चक्रवाते न मृतकानां संख्या षड्विंशति: अभवत्। अस्मिन् चक्रवाते अष्टअसीति: जना आहता:। द्विविंशति: जना:  विलुप्ता: सन्ति। चक्रवात् कारणेन् पञ्चाशताधिक-एकलक्ष-गृहाणि प्रध्वंसितानि। वियतनाम देशस्य प्रधानमंत्री स्थानीय प्रशासन निर्दिष्वान् यत् आवश्यक सुरक्षा-कार्याणि कुर्यात् तेन शैक्षणिक संस्थानां चिकित्सा सौविध्यानाम् च पुन: संचालनाय  प्रशानं निर्दिष्टम् तेन शोक-संतप्त जनान् प्रति संवदेना: प्रकटिता: ।

## पाकिस्तानस्य क्वेटायां विस्फोट:

पाकिस्तानस्य क्वेटा नगरे पाकिस्तान अर्धसैन्य बलस्य मुख्यालयस्य बहि: दुरापादिते विस्फोटे दश जना: मृता:। सुरक्षा बलै: प्रोक्तं यत् प्रत्युत्तरे आत्मघातिनं समेत्य षड् आतंकवादिन: व्यापादिता:।

## क्रिकेट

महिलानां एकदिवसीय-विश्व-चषक-क्रिकेट-स्पर्धायाम् अद्य प्रथमा स्पर्धा भारत श्रीलंका दलयोः मध्ये गुवाहाट्यां प्रचलति। श्रीलङ्का दलेन पणकं विजित्य कन्दुकक्षेपणं  स्वकृतम्।

भारतीयदलेन च अन्तिमवर्ताः लेखनसमयं यावत् अष्टाविंशतिः क्षेपचक्रेषु षड्-क्रीडिकाणां हानौ पञ्चविंशत्युत्तरैकशतं धावनाङ्काः निर्मिताः।